# वैयाकरणसिद्धान्तकौमुदी

## अजन्तनपुंसकलिङ्गप्रकरणम् (४)

१२.०७.२०११

- इकारान्तः नपुंसकलिङ्गः 'अनादि' शब्दः ।
- त्रिलिङ्गोऽयं शब्दः विशेष्यनिघ्नः ।
- न विद्यते आदिः यस्य सः अनादिः – ईश्वरः । (हरिशब्दवत्)
- न विद्यते आदिः यस्याः सा अनादिः – अविद्या । (मतिशब्दवत्)
- न विद्यते आदिः यस्य तत् अनादि – ब्रह्म । (???)
- अनादिशब्दः प्रथमा-द्वितीयाविभक्त्योः वारिशब्दवत् ।

# ३२१. तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (७.१.७४)

- पदचतुष्टयम् । तृतीयादिषु, भाषितपुंस्कम्, पुंवद्, गालवस्य ।
- 'नपुंसकस्य झलचः' (७.१.७२) इत्यतः 'नपुंसकस्य' इति, 'इकोऽचि विभक्तौ' (७.१.७३) इति च अनुवर्तते ।
- प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कम् इगन्तं क्लीबं पुंवद् वा स्यात् टादावचि ।
- यद् विशेषणं पुरस्कृत्य घटादिशब्दाः तत्तद्व्यक्तिषु प्रयुज्यन्ते, तद् विशेषणं प्रवृत्तिनिमित्तम् इत्युच्यते ।
- उदा : घटशब्दस्य प्रयोगे घटत्वं प्रवृत्तिनिमित्तत्वम् ।
- मनुष्यशब्दस्य प्रयोगे मनुष्यत्वं प्रवृत्तिनिमित्तम् ।

- नपुंसके लिङ्गान्तरे (पुँल्लिङ्गे) च यस्य एकमेव प्रवृत्तिनिमित्तं, तद् भाषितपुंस्कम् इत्युच्यते ।
- उदा: अनादिशब्दस्य नपुंसकलिङ्गप्रयोगे प्रवृत्तिनिमित्तं भवति अनादित्वम् ।
- तस्य पुंलिङ्गप्रयोगेऽपि प्रवृत्तिनिमित्तम् अनादित्वमेव ।
- तस्माद् अयं शब्दः भाषितपुंस्कः ।
- अनादये, अनादिने – इत्यादि । शेषं वारिवत् ।
- सर्वासु विभक्तिषु वारिवद्रूपाणि । तृतीयादौ अजादिषु हरिशब्दवद् अपरं रूपम् ।

- प्रवृत्तिनिमित्तैक्ये इति किम्?
- पीलुः वृक्षः, तत्फलं पीलु ।
- तस्मै पीलुने ।
- यदा वृक्षविशेषः पीलुशब्दवाच्यः, तदा पुँल्लिङ्गः पीलुशब्दः । यदा पीलुजन्यफलं पीलुशब्दवाच्यम्, तदा नपुंसकलिङ्गः ।
- वृक्षवाच्यत्वे प्रवृत्तिनिमित्तं भवति पीलुत्वम् । फलवाच्यत्वे तु पीलुजत्वम् ।
- अत्र न पुंवत्, प्रवृत्तिनिमित्तभेदात् ।
- पीलुर्वृक्षः फलं पीलु पीलुने न तु पीलवे ।
- वृक्षे निमित्तं पीलुत्वं तज्जत्वं तत्फले पुनः ॥

अस्थि, दधि, सक्थि, अक्षि – इति इकारान्ताः नपुंसकलिङ्गाः ।

प्रथमा-द्वितीयाविभक्त्योः वारिवत् ।

# ३२२. अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः (७.१.७५)

- पदत्रयम् । अस्थि-दधि-सक्थि-अक्ष्णाम्, अनङ्, उदात्तः ।
- 'इकोऽचि विभक्तौ' (७.१.७३) इत्यतः 'अचि विभक्तौ' इति, 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' (७.१.७४) इत्यतः 'तृतीयादिषु' इति च अनुवर्तते ।
- एषाम् अनङ् स्यात् टादावचि, स च उदात्तः ।

- दधि (टा) आ
- दधन् आ ('अस्थि-दधि...' इति अनङ्)
- दध्ना ('अल्लोपोऽनः' – ६.४.१३४ – इति अल्लोपः)

- दध्ने ।
- दध्नः ।
- दध्नः, दध्नोः, दध्नाम् ।
- दध्नि/दधनि । ('विभाषा ङिश्योः' – ६.४.१३६ – इत् वा अल्लोपः)
- दध्नोः ।
- शेषं वारिवत् ।
- एवम् अस्थि-सक्थि-अक्षीणि ।
- तदन्तस्यापि अनङ् । अतिदध्ना ।

# ईकारान्ताः नपुंसकलिङ्गाः

- ‘ह्रस्वो नपुंसके प्रातिपदिकस्य’ (१.२.४७) इति ह्रस्वः ।
- सुधि, सुधिनी, सुधीनि ।
- हे सुधे, हे सुधि ।
- सुधिया / सुधिना ।
  - ‘तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य’ इति पुंवद्भावः ।
  - ‘न भूसुधियोः’ इति यणः निषेधात् ‘अचि श्नु..’ इति इयङ् ।
- सुधियाम्, सुधीनाम् ।
- प्रधि, प्रधिनी, प्रधीनि ।
- प्रध्या / प्रधिना ।
  - ‘एरनेकाचोऽसंयोगपूर्वस्य’ इति यण् ।

# उकारान्ताः नपुंसकलिङ्गाः

- मधु, मधुनी, मधूनि ।
- हे मधो, हे मधु ।
- वारिवत् ।
- एवम् अम्ब्वादयः ।
- सानुशब्दस्य स्नुर्वा ।
- ‘मांस-पृतना-सानूनां मांस-पृत्-स्नवो वाच्याः’ (वा) ।
- स्नूनि / सानूनि ।

- प्रियक्रोष्टु, प्रियक्रोष्टुनी ।
- जसि सर्वनामस्थानत्वात् ‘तृज्वत्क्रोष्टुः’ (७.१.९५) इति प्राप्ते,
- तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम् ।
- ‘वृद्धि-औत्त्व-तृज्वद्भाव-गुणेभ्यो नुम् पूर्वविप्रतिषेधेन’ (वा)
- प्रियक्रोष्टूनि ।
- टादौ पुंवत्पक्षे, [‘विभाषा तृतीयादिष्वचि’ (७.१.९७) – इति वा तृज्वद्भावः]
- प्रियक्रोष्ट्रा / प्रियक्रोष्टुना ।
- प्रियक्रोष्ट्रे / प्रियक्रोष्टवे ।
- अन्यत्र (नपुंसकलिङ्गे) तृज्वद्भावात् पूर्वविप्रतिषेधेन नुमेव ।
- प्रियक्रोष्टुना । प्रियक्रोष्टुने ।

‘नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन’ (वा) इति नुट् ।

प्रियक्रोष्टूनाम् ।